# नलोपाख्यानम्

15

बृहदश्व उवाच।

तस्मिन्नन्तर्हिते नागे प्रययौ नैषधो नलः।

ऋतुपर्णस्य नगरं प्राविशद्दशमे ऽहनि॥ ३-६४-१ ॥

स राजानमुपातिष्ठद्बाहुको ऽहमिति ब्रुवन्।

अश्वानां वाहने युक्तः पृथिव्यां नास्ति मत्समः॥ ३-६४-२ ॥

अर्थकृच्छ्रेषु चैवाहं प्रष्टव्यो नैपुणोषु च।

अन्नसंस्कारमपि च जानाम्यन्यैर्विशेषतः॥ ३-६४-३ ॥

यानि शिल्पानि लोके ऽस्मिन्यच्चाप्यन्यत्सुदुष्करम्।

सर्वं यतिष्ये तत्कर्तुमृतुपर्ण भरस्व माम्॥ ३-६४-४ ॥

ऋतुपर्ण उवाच।

वस बाहुक भद्रं ते सर्वमेतत्करिष्यसि।

शीघ्रयाने सदा बुद्धिर्धीयते मे विशेषतः॥ ३-६४-५ ॥

स त्वमातिष्ठ योगं तं येन शीघ्रा हया मम।

भवेयुरश्वाध्यक्षो ऽसि वेतनं ते शतं शताः॥ ३-६४-६ ॥

त्वामुपस्थास्यतश्चेमौ नित्यं वार्ष्णेयजीवलौ।

एताभ्यां रंस्यसे सार्धं वस वै मयि बाहुक॥ ३-६४-७ ॥

बृहदश्व उवाच।

एवमुक्तो नलस्तेन न्यवसत्तत्र पूजितः।

ऋतुपर्णस्य नगरे सहवार्ष्णेयजीवलः॥ ३-६४-८ ॥

स तत्र निवसन्राजा वैदर्भीमनुचिन्तयन्।

सायं सायं सदा चेमं श्लोकमेकं जगाद ह॥ ३-६४-९ ॥

क्व नु सा क्षुत्पिपासार्ता श्रान्ता शेते तपस्विनी।

स्मरन्ती तस्य मन्दस्य कं वा साद्योपतिष्ठति॥ ३-६४-१० ॥

एवं ब्रुवन्तं राजानं निशायां जीवलो ऽब्रवीत्।

कामेनां शोचसे नित्यं श्रोतुमिच्छामि बाहुक॥ ३-६४-११ ॥

तमुवाच नलो राजा मन्दप्रज्ञस्य कस्यचित्।

आसीद्बहुमता नारी तस्या दृढतरं च सः॥ ३-६४-१२॥

स वै केनचिदर्थेन तया मन्दो व्ययुज्यत।

विप्रयुक्तश्च मन्दात्मा भ्रमत्यसुखपीडितः॥ ३-६४-१३॥

दह्यमानः स शोकेन दिवारात्रमतन्द्रितः।

निशाकाले स्मरंस्तस्याः श्लोकमेकं स्म गायति॥ ३-६४-१४॥

स वै भ्रमन्महीं सर्वां क्वचिदासाद्य किंचन।

वसत्यनर्हस्तद्दुःखं भूय एवानुसंस्मरन्॥ ३-६४-१५॥

सा तु तं पुरुषं नारी कृच्छ्रे ऽप्यनुगता वने।

त्यक्ता तेनाल्पपुण्येन दुष्करं यदि जीवति॥ ३-६४-१६॥

एका बालानभिज्ञा च मार्गाणामतथोचिता।

क्षुत्पिपासापरीता च दुष्करं यदि जीवति॥ ३-६४-१७॥

श्वापदाचरिते नित्यं वने महति दारुणे।

त्यक्ता तेनाल्पपुण्येन मन्दप्रज्ञेन मारिष॥ ३-६४-१८॥

इत्येवं नैषधो राजा दमयन्तीमनुस्मरन्।

अज्ञातवासमवसद्राज्ञस्तस्य निवेशने॥ ३-६४-१९॥